संस्कृत-वार्ता:

19.10.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· बिहारविधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय द्वाविंशत्युत्तरशत-निर्वाचनक्षेत्रेषु नामाङ्कन-पञ्जीकरण-प्रक्रिया वर्तते जायमाना । श्वः एतस्मै चरणाय नामाङ्कनस्य अन्तिमा तिथिः ।

· उत्तर-प्रदेशस्य अयोध्या-नगरे अद्य दीपावली-पर्वणः पूर्व-सन्ध्यायां आयोजयिष्यते भव्यदीपोत्सवः। अत्रावसरे श्री वैष्णवः असूचयत् यत् उत्सवावधौ अशेषे देशे प्रायः द्वादशसहस्राणि विशिष्टानि रेलयानानि प्रचलन्ति इति।

· केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र-सिंहः अवदत् यत् भारतेन स्वकीयं प्रथमं स्वदेशी-प्रतिजैविकम्, 'नैफिथ्रोमाइसिन्' इति, विकासितम्।

· बलूचिस्तानस्य विभिन्न-भागेभ्यः पाकिस्तानी-सुरक्षाबलेन अष्टनागरिकाः बलपूर्वकं विलोपिताः ।

· पुरुष-क्रिकेट-क्रीडायां, आस्ट्रेलिया-देशः भारतं सप्तस्तोभैः पराजयत्।

<u>रक्षामन्त्री बिहार-निर्वाचनम्</u>

बिहारविधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय द्वाविंशत्युत्तरशत-निर्वाचनक्षेत्रेषु नामाङ्कन-पञ्जीकरण-प्रक्रिया जायमाना वर्तते। श्वः एतस्मै चरणाय नामाङ्कनस्य अन्तिमा तिथिः अस्ति। राज्यस्य विंशति-जनपदानां द्वाविंशत्युत्तरशत-विधानसभा-क्षेत्रेषु नवम्बरमासस्य एकादश-दिनाङ्के मतदानं भविष्यति। प्रत्याशिनः अक्टूबर-मासस्य त्रयोविंशति दिनाङ्कं यावत् स्वनामाङ्कनं प्रत्यावर्तितुं शक्नुवन्ति। प्रथमचरणाय अपि श्वः नामाङ्कन-प्रत्यावर्तनस्य अन्तिमा तिथिः अस्ति, यत्र एकविंशत्युत्तरशतम् विधानसभा-क्षेत्राणि समाविष्टानि सन्ति। भारतीयजनतापार्टीति-दलेन तथा जनतादलेन निर्वाचन-प्रचारार्थं स्वकीयाः वरिष्ठ-प्रचारकाः विनियोजिताः । दीपावली-पर्वणः अनन्तरं प्रचारः तीव्रतरः भविष्यतीति आशास्यते । अत्रान्तरे राज्ये स्वतन्त्र-निष्पक्ष-निर्वाचनार्थं आरक्षकाः तथैव विभिन्नानि प्रवर्तनाभिकरणानि कठोरतया

निरीक्षणं कुर्वन्ति । आयकर-विभागः, राज्य-आरक्षक-विभागः तथा मद्य-विभागश्च कठोर-कार्याचरणाय प्रयतन्ते।

अक्टूबर-मासस्य षष्ठे दिनाङ्के आदर्शाचार-संहितायाः कार्यान्वयनानन्तरं अधिकारिभिः द्वि-दशमलव-त्रिसप्ततिकोटि-रूप्यकाणां धनराशिः , द्वाविंशतिकोटि-रुप्यतोऽप्यधिका मदिरा, षोडश-दशमलव-एकविंशति-कोटिरूप्यकेभ्यः अपि अधिकानि मादक-द्रव्याणि, अथ च पञ्चकोटि-रूप्यतोऽप्यधिकाः धातवः अधिगृहीताः। एतदतिरिच्य मतदातृभ्यः प्रदीयमानाः द्वादश-कोटि-रूप्यकाणां उपहाराः अपि स्वायत्तीकृताः।

<u>अयोध्या-दीपोत्सवः</u>

उत्तर-प्रदेशस्य अयोध्या-नगरे अद्य दीपावली-पर्वणः पूर्व-सन्ध्यायां भव्यदीपोत्सवः आयोजयिष्यते। उत्तरप्रदेश-सर्वकारः अद्य रामस्य पैडी-स्थलं समेत्य अयोध्यायाः षट्पञ्चाशत्-घट्टेषु षड्विंशति-लक्षाधिकान् दीपकान् प्रज्वाल्य गिनीज़्-विश्व-कीर्ति-स्थापनार्थं लक्ष्यं स्थापयिष्यति। अस्मिन् वर्षे अपरां विश्व-कीर्तिं निर्मातुं प्रयासः करिष्यते, यस्मिन् एकविंशति-शतं वेदाचार्याः सरयू-नद्याः तटे महानीराजनं करिष्यन्ति तथा श्लोकानां पाठं करिष्यन्ति। राज्यपालः आनन्दीबेन-पटेलः, मुख्यमन्त्री योगी-आदित्यनाथः तथा अन्ये बहवः मन्त्रिणः च एतस्य कार्यक्रमस्य शोभां वर्धयिष्यन्ति।

<u>जितेन्द्र-नैफिथ्रोमाइसिन्:</u>

केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र-सिंहः अवदत् यत् भारतेन स्वकीयं प्रथमं स्वदेशी-प्रतिजैविकम्, 'नैफिथ्रोमाइसिन्' इति, विकासितम्। एतत् तावत् देशस्य औषध-जैवप्रौद्योगिकी-क्षेत्रयोः आत्मनिर्भरतादिशि महत्त्वपूर्णोपलब्धिः वर्तते। डॉ. सिंहः अवदत् यत् एतत् प्रतिजैविकम् प्रतिरोधक-श्वसन-सङ्क्रमणेषु प्रभावकारकमस्ति । विशेषतः कर्करोगग्रस्तेभ्यः रोगिभ्यः अपि लाभप्रदं वर्तते । ह्यः नवदिल्ल्यां त्रिदिवसीय-चिकित्सा-कार्यशालायाः उद्घाटनावसरे मन्त्रिणा हीमोफीलिया इत्यस्य उपचारे जीन-चिकित्सायाः कृते स्वदेशी-नैदानिक-परीक्षणस्य अन्या महती वैज्ञानिकोपलब्धिः अपि प्रकाशिता ।

## <u>वैष्णव निरीक्षण</u>

केन्द्रीय-रेलमन्त्री अश्विनी वैष्णवः अवोचत् यत् नवदेहली-रेलस्थानके निर्मितं होल्डिङ्ग्-क्षेत्रम् यात्रिकानुभवं उत्तमतया परिष्करोति।। श्री वैष्णवः गतरात्रौ उत्सवावधौ रेलस्थानके जनसञ्चयस्य निरीक्षणं कुर्वन् आसीत्। मन्त्री अवदत् यत्, यात्रि-सुविधा-केन्द्रस्य भागस्य होल्डिङ्ग्-क्षेत्रे अनेकानि चिटिका-केन्द्राणि, शौचालयाः च सन्ति, येन यदि प्रायः पंचसप्तति सहस्राधिकाः जनाः उपस्थिताः भवेयुः चेदपि यात्रिकाणां सुगम-सञ्चारः सम्भवति।

सः एतदपि अकथयत् यत् अत्यधिक-जनसम्मर्दः सत्यपि रेल्-कर्मचारिणः सुगम-प्रचालनं, यात्रिकाणां सुलभतां च सुनिश्चेतुम् अहर्निशं कार्यं कुर्वन्तः सन्ति। श्री वैष्णवः इतोऽपि संसूचयत् यत् उत्सवावधौ अशेषे देशे प्रायः द्वादश सहस्राणि विशिष्टानि रेलयानानि प्रचलन्ति इति।

मन्त्री लघु-नियन्त्रण-कक्षम् अपि अगच्छत्, यस्मात् सम्पूर्णे स्थले स्थापितानां सी. सी. टी. वी.-चित्रयन्त्राणां साहाय्येन सुरक्षा-निरीक्षणं भवति। अत्रान्तरे, बिहार-उत्तरप्रदेश-समेत्य उत्तरभारतस्य विभिन्नानां गन्तव्यस्थानानां कृते शतशः विशिष्ट रेलयानानि सन्ति। दीपावली -छठ्-पूजयोः समये भक्तानां यात्रिकाणां च सुगमं सुखप्रदं च यात्रां सुनिश्चेतुम् अस्य कार्यस्य उद्देश्यं वर्तते।

## <u>जी एस टी</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना घोषितं यत्, गतमासस्य द्वादश दिनाङ्के प्रारब्धं जी. एस्. टी. बचत-उत्सवः, समाजस्य सर्ववर्गेभ्यः जनेभ्यः लाभप्रदो वर्तते । नागालैण्ड्-राज्यस्य अर्थव्यवस्थायां जी. एस. टी.- परिष्कारः बहुविध-उद्योगेषु कर-मूल्यांकनं तर्कसङ्गतं करोति राज्यस्य अर्थव्यवस्थां सुदृढां कर्तुं महत्त्वपूर्णं पदं निर्दिशति। एते परिष्काराः सर्वसमावेशकविकासाय, शिल्पकाराणां, कृषकाणां, सूक्ष्म-उद्यमानां च सशक्तीकरणाय अवसरम् आनयेयुः। जी. एस्. टी. द्वादश प्रतिशततः अपचीय पंचप्रतिशतं यावत् अभवत्। प्रायः द्वादशशत लघुधारकाः, एम्. एस्. एम्. ई. इत्येते च जी. एस्. टी.-परिष्कारैः अधिक-लाभान् प्राप्नुयुः।

सिमेण्ट्-क्षेत्रे जी. एस्. टी. इत्यस्य अष्टादश प्रतिशतं यावत् न्यूनीकरणेन निर्माणव्ययः न्यूनीकृतः । जनजातीयानां वनशिल्पानां च जी. एस्. टी. इत्यस्य पंच प्रतिशतं न्यूनीकरणेन

विपणीषु दशतः पंचदश प्रतिशतं वृद्धिः अभवत्, सममेव षट् विंशत्यधिक द्विसहस्रतमवर्षपर्यन्तं प्रायः पंच सहस्र नूतनव्यवसायस्य उत्पत्तिः भविष्यति इति सम्भाव्यते।

## बलूचिस्तान-नागरिकाः

पाकिस्तानस्थ बलूचिस्तानस्य विभिन्न-भागेभ्यः पाकिस्तानी-सुरक्षाबलेन अष्टनागरिकाः बलपूर्वकं विलोपिताः । स्थानीय-वार्ताहरैः अद्य सूचितं यत् पंजगुर-मस्तुंग-खरान इत्येतेभ्यः स्थलेभ्यः बहवः युवकाः निगृहीताः तथैव अज्ञातस्थानेषु नीताः । पाकिस्तान-बलेन अद्य प्रातः पादोन-द्विवादने खरानस्य किल्ली-हसनाबादक्षेत्राभ्यां तेषां गृहात् चत्वारः युवकाः निगडिताः। मानवाधिकार-सङ्घटनेन बलूच-यकजेहती-समित्या च ह्यः बलूचिस्ताने पाकिस्तान-अधिकारिभिः बलपूर्वक-लोपितानां न्यायेतर-हत्यानां यातनानां च विषयः प्रकाशितः ।

मानवाधिकार-सङ्घटनस्य प्रतिवेदनानुसारं क्वेटा-केच-अवारन इत्यादिभिः सह बलूचिस्तानस्य बहुषु जनपदेषु बलपूर्वक-लोपितानां जनानां सर्वाधिका संख्या पञ्जीकृतास्ति ।

## क्रिकेट

पुरुष-क्रिकेट-क्रीडायां, अद्य सायङ्काले त्रि-क्रीडा-श्रृङ्खलायाः प्रथम-ओ. डि. आई - क्रीडायां आस्ट्रेलिया-देशः भारतं सप्तस्तोभैः पराजयत्। आस्ट्रेलिया देशः एकविंशतिः क्षेपणचक्रेषु एकत्रिंशदधिकैकशत-धावनांकैः विजितवान्। श्रृङ्खलायाः द्वितीया स्पर्धा अक्टोबर् मासस्य त्रयोविंशति दिनाङ्के एडिलेड्-नगरे भविष्यति।

।। इति वार्ताः ।।